इत्येतद्व्याचक्षाणः धान्यकोष्ठसञ्चयो वा स्यात् द्वादशाहमात्रपर्य्याप्तधनः इति कुम्भीधान्यक इत्येतद्व्याचष्टे। उष्ट्रिकाप्रमाणधान्यादिसञ्चयोवा षड्हमात्रपर्य्याप्तधनः इति”। तेन २तदर्थयोरपि

**कुम्भीनस** पु॰कुम्भीव नसा नासायस्य।१ क्रूरसर्पे मेदि॰२रावणमातृष्वस्रेयां लवणासुरजनन्यां स्त्री ङीष्। तदुत्पत्तेः तस्या मधुदैत्येन हरणस्य च कथा रामा॰उत्तर॰का॰२५अ॰ “विभीषणस्तु संक्रुद्धो भ्रातरं वाक्यमब्रवीत्। श्रूयतामस्य पापस्य कर्म्मणः फलमागतम्। मातामहस्य योऽस्माकं ज्येष्ठोभ्राता सुमालिनः। माल्यवानिति विख्यातोवृद्धः प्राज्ञोनिशाचरः। पितृज्येष्ठो जनन्या नोह्यस्माकं चार्य्यकोऽभवत्। तस्य कुम्भीनसी नाम दुहितुर्दुहिताऽभवत्। मातृष्वसुरथास्माकं सा च कन्याऽनलोद्भवा। भवत्यस्माकमेवैषा भ्रातृणां धर्मतःस्वसा। सा हृता मधुना राजन्नसुरेण बलीयसा। यज्ञप्रवृत्ते पुत्रे तु मयि चान्तर्जलोषिते। कुम्भकर्णे महाराज! निद्रामनुभवत्यथ। निहत्य राक्षसश्रेष्ठानमात्यानिह संमतान्। धर्षयित्वा हृता राजन्! गुप्ताप्यन्तःपुरे तव। श्रुत्वापि तन्महाराज! क्षान्तमेव हतो न सः। यस्मादवश्यं दातव्या कन्या भर्त्रे हि भ्रातृभिः। तदेतत्कर्मणो ह्यस्य फलं पापस्य दुर्मतेः। अस्मिन्नेवाभिसंप्राप्तं लोके विदितमस्तु ते। विभीषणवचः श्रुत्वा राक्षसेन्द्रः स रावणः। दौरात्म्येनात्मनोद्भूतस्तप्ताम्भा इव सागरः। ततोऽब्रवीद्दशग्रीवः क्रुद्धः संरक्तलोचनः। कल्प्यतां मे रथः शीघ्रं शूराः सज्जीभवन्तु नः। भ्राता मे कुम्भकर्णश्च ये च मुख्या निशाचराः। वाहनान्यधिरोहन्तु नानाप्रहरणायुधाः। अद्य तं समरे हत्वा मधुं रावणनिर्भयम्। सुरलोकं गमिष्यामि युद्धाकाङ्क्षी सुहृद्वृतः। अक्षौहिणीसहस्राणि चत्वार्य्यग्र्याणि रक्षसाम्। नानाप्रहरणान्याशु निर्ययुर्युद्धकाङ्क्षिणाम्। इन्द्रजित्त्वग्रतः सैन्यात्सैनिकान् परिगृह्य च। जगाम रावणो मध्ये कुम्भकर्णश्च पृष्ठतः। विभीषणश्च धर्म्मात्मा लङ्कायां धर्म्ममाचरत्। शेषाः सर्वे महाभागा ययुर्मधुपुरं प्रति। खरैरुष्ट्रैर्हयैर्दृप्तैः शिशुमारैर्महोरगैः। राक्षसाः प्रययुः सर्वे कृत्वाऽऽकाशं निरन्तरम्। दैत्याश्च शतशस्तत्र कृतवैराश्च दैवतैः। रावणं प्रेक्ष्य गच्छन्तमन्वगच्छन् हि पृष्ठतः। स तु गत्वा मधुपुरं प्रविश्य च दशाननः। न ददर्श मधुं तत्र भगिनीं तत्र दृष्टवान्। सा च प्रह्वाञ्जलिर्भूत्वा शिरसा चरणौ गता। तस्य राक्षसराजस्य त्रस्ता कुम्भीनसी तदा। तां समुत्थापयामास न भेतव्यमिति ब्रुवन्। रावणो राक्षसश्रेष्ठः किं चापि करवाणि ते। साऽब्रवीद्यदि मे राजन्! प्रसन्नस्त्वं महाभुज!। भर्तारं न ममेहाद्य हन्तुमर्हसि मानद!। नहीदृशं भयं किंचित्कुलस्त्रीणामिहोच्यते। भयानामपि सर्वेषां वैधव्यं व्यसनं महत्। सत्यवाग्भव राजेन्द्र! मामवेक्षस्व याचतीम्। त्वयाप्युक्तं महाराज! न भेतव्यमिति स्वयम्। रावणस्त्वब्रवीद्धृष्टः स्वसारं तत्र संस्थिताम्। क्व चासौ तव भर्त्ता वै मम शीघ्रं निवेद्यताम्। सह तेन गमिष्यामि सुरलोकं जयाय हि। तव कारुण्यसौहार्दान्निवृत्तोऽस्मि मधोर्वधात्”

तस्याः पतिपुत्रयोश्चरितवर्णनं रामा॰ उत्त॰ ६१अ॰ यथा “पूर्वं कृतयुगे राजन्दैतेयःसुमहामतिः। लोलापुत्रोऽभवज्ज्येष्ठो मधुर्नाम महासुरः। ब्रह्मण्यश्च शरण्यश्च बुद्ध्या च परिनिष्ठितः। सुरैश्च परमोदारैः प्रीतिस्तस्याऽतुलाऽभवत्। स मधुर्वीर्यसंपन्नो धर्मे च सुसमाहितः। बहुमानाच्च रुद्रेण दत्तस्तस्याद्भुतोवरः। शूलं शूलाद्विनिष्कृष्य महावीर्य्यं महाप्रभम्। ददौ महात्मा सुप्रीतो वाक्यं चैतदुवाच ह। त्वयाऽयमतुलो धर्मोमत्प्रसादकरः शुभः। प्रीत्या परमया युक्तोददाम्यायुधमुत्तमम्। यावत् सुरैश्च विप्रैश्च न विरुध्येर्महासुर!। तावच्छूलं तवेदं स्यादन्यथा नाशमेष्यति। यश्च त्वामभियुञ्जीत युद्धाय विगतज्वरः। तं शूलोभस्मसात्कृत्वा पुनरेष्यति ते करम्। एवं रुद्राद्वरं लब्ध्वा भूयएव महासुरः। प्रणिपत्य महादेवं वाक्यमेतदुवाच ह। भगवन्! मम वंशस्य शूलमेतदनुत्तमम्। भवेत्तु सततं देव। सुराणामीश्वरोह्यसि। तं ब्रुवाणं मधुं देवः सर्वभूतपतिः शिवः। प्रत्युवाच महादेवोनैतदेवं भविष्यति। मा भूत्ते विफला वाणी मत्प्रसादकृता शुभा। भवतः पुत्रमेकं तु शूलमेतद् गमिष्यति। यावत् करस्थः शूलोऽयं भविष्यति सुतस्य ते। अवध्यः सर्वभूतानां शूलहस्तो भविष्यति। एवं मधुर्वरं लब्ध्वा देवात् सुमहदद्भुतम्। भवनं सोऽसुरश्रेष्ठः कारयामास सुप्रभम्। तस्य पत्नी महाभागा प्रिया कुम्भीनसीति या। विश्वावसोरपत्यं साप्यनलायां महाप्रभा। तस्याः पुत्रो महावीर्योलवणोनाम दारुणः। बाल्यात् प्रभृति दुष्टात्मा पापान्येव समाचरत्। तं पुत्रं दुर्विनीतं तु दृष्ट्वा क्रोधसमन्वितः। मधुःस शोकमापेदे न चैनं किञ्चिदब्रवीत्। स विहाय इमं लोकं प्रवि-